
# श्रीरस्तु

# विनय — विज्ञप्तिः

श्रीरामभद्रकविशेखरनिर्मिता या
धीरादृता जयति पञ्चशतीति चित्रा ।
सा राममातुलकृतिर्हरतात्प्रमोहं
घोरान्तरं गजमिव त्वरितं मृगेन्द्रः ॥ 1 ॥

भागद्वयात्मकमिदं हि न नामसंख्यैः
श्लोकैरुपेतमतिचारुविचित्रबन्धैः ।
चित्रोत्तरादिमपदार्थसुभावगूढैः
वेगैर्युतं प्रकरणैर्जयतीह काव्यम् ॥ 2 ॥

धीदं मृदुमतिभीदं रामकवीशाननिर्मितं हीदम् ।
विजयति हतबहुखेदं विरचितमोदं धुतामृतास्वादम् ॥ 3 ॥



हरिः ओम्

# चित्रकाव्यम्

## प्रथमपरिच्छेदः

### प्रथमप्रकरणम् - मंगलम्

वन्दे वाञ्छितदानैकदीक्षितौ दिव्यदम्पती ।
अन्योन्येच्छाविभक्तात्मगुणौ लक्ष्मीचतुर्भुजौ ॥ 1 ॥


व्याख्या-वन्द इति । अन्योन्येत्यादि - सर्वज्ञत्वसर्वशक्तत्वाद्युभय-साधारणगुणानां पुंसत्व-स्त्री-दण्डधरत्व-पुरूषकारत्वादि-तत्तन्नियत गुणानाञ्च तदुभयेच्छासिद्धत्वमिति भावः ।

स्तोकेतराद्भुतदयादिगुणाम्बुराशिं राकेन्दुसुन्दरमुखं रमणीयरूपम् ।
नाकेशमुख्यसुरवन्दितपादपद्मं काकोदरेशगिरिनायकमाश्रयेऽहम् ॥ 2 ॥

प्रपद्ये जानकीनाथं प्रपन्नार्तिहरं प्रभुम् ।
यदङ्घ्रिरेणुश्श्वसुरो गौतमस्य मुनेरभूत् ॥ 3 ॥

जीयात् गुरुवेङ्कटनाथघण्टादिव्यावतारस्स हि रंगराजः ।
यः पादुकां पंचषनाडिकासु पद्यैस्सहस्त्रेण परिश्चकार ॥ 4 ॥

कुर्वे चित्रमयं काव्यं रामभद्रस्सतां मुदे ।
गुणज्ञा यदि दोषोऽत्र क्षन्तुमर्हन्ति पण्डिताः ॥ 5 ॥



# द्वितीयप्रकरणं - तन्त्रोत्तरम्

ग्रीष्मे तु कीदृशी कुल्या कीदृशी च कुलाङ्गना ।
प्रश्नयोरुभयोरेकं वाच्यमुत्तरमञ्जसा ॥ 6 ॥
व्याख्या - ग्रीष्म इति । अपापा इत्युत्तरम् । अपां समूहः आपम् ।
अपगतम् आपं यस्यास्सा अपापेति । पापरहितेति च ।

वृक्षालिः कीदृशी च्छायां न करोति च शूलिन : ।
पत्नी का प्रश्नयोरेकं विदुषा वाच्यमुत्तरम् ॥ 7 ॥
वृक्षालिरिति - अपर्णेत्युत्तरं ज्ञेयं ।


कदाचिदप्यविश्वास्याः के वा ग्रीष्मे तु कीदृशः ।
नदीप्रवाहो वक्तव्यं प्रश्नयोरेकमुत्तरम् ॥ 8 ॥
कदाचिदिति-अरय इत्युत्तरम् । शात्रवः । वेगरहितः ।

नित्यवस्तुगुणः कीदृक् के पान्ति मधु पुष्पगम् ।
प्रश्नयोरनयोरेकं बुधैर्वक्तव्यमुत्तरम् ॥ 9 ॥
नित्येति - अलय इत्युत्तरम् । नाशरहितः । लळयोरभेदात् अळयः भ्रमरा इति च ।

के वा सर्वात्मना रक्ष्याः को दुर्ब्राह्मण उच्यते ।
एकमेवोत्तरं देयं प्रश्नयोरुभयोरपि ॥ 10 ॥
केवेति - असव इत्युत्तरम् । प्राणाः । यज्ञशून्यः ।

कीदृशी वा पुष्करिणी संसृतिः कीदृशी भवेत् ।
भो भो महान्तो वदत प्रश्नयोरेकमुत्तरम् ॥ 11 ॥
कीदृशीति - सतामरसा इत्युत्तरम् । तामरससहिता । सताम् अरसा रागरहिता ।

कीदृशो भवति पुण्यवान् मृतः कीदृशश्च न भवेदुमापतिः ।
गृध्रराडपि च कीदृशो वने वालिसूनुमुखवानरादृतः ॥ 12 ॥
कीदृश इति - अविराजविरोधिभूषित इत्युत्तरम् । अविराजानां पर्वतश्रेष्ठानां विरोधी - इन्द्रः तद्भूः स्वर्गः -



तत्र उषितः। विराजः गरूडः तद्विरोधिनः सर्पाः - तैः भूषितो न भवति इति अविराजविरोधिभूषितः। गृध्रराट् - सम्पातिः। अविराजविरोधी सूर्यचन्द्र विरोधी विन्ध्यपर्वतः तद्भुवि - तत्प्रदेशे उषितः। सीतान्वेषण काल इति ज्ञेयम्। (अविः - सूर्यः, पर्वतः। अवयश्शैलमेषार्का इत्यमरः।)

कीदृग्भूतो भवेद्रुद्रः कीदृशो न भवेदिति।
प्रश्नयोरनयोश्शीघ्रं एकमेवोत्तरं वद ॥ 13 ॥
कीदृगिति - अगजाननादर इत्युत्तरम्। अगजायाः उमायाः आनने आदरो यस्येति पूर्वत्र। गजानने आदरो न विद्यते यस्य सः अगजाननादर इत्युत्तरत्र।

## तृतीयप्रकरणं - व्याससमासोत्तरम्

को वा ददाह स्मरमिन्द्रलूनपक्षश्च कः को हि दृशा श्रृणोति।
प्रश्नत्रयस्यैकपदेन वाच्यमत्रोत्तरं व्याससमासतस्तु ॥ 14 ॥
को वेति - उरग इत्युत्तरम्। उः-शंभुः, अगः-पर्वतः इति व्यासेन। उरगः- सर्प इति समासेन।

पक्षाभ्यां याति कः कोपमूलं किं कीदृशो यतिः।
प्रश्नानामुत्तरं ब्रूहि विराग इति तन्त्रतः ॥ 15 ॥
पक्षाभ्यामिति - विः, आगः, विराग इति स्पष्टमेव।

निर्मलं किं सरस्यास्ते कः शक्रच्छिन्नपक्षकः।
मुक्तासरादिभिर्हारैः भूषितो योषितान्चकः ॥ 16 ॥
निर्मलमिति - पयोधर इत्युत्तरम्। पयः जलम्, धरः-पर्वतः, पयोधरः-स्तनः। स्त्रीस्तनाब्धौ पयोधराविति नानार्थरत्नमाला।

पक्षिलक्ष्म्यचला वाच्याः कथं कान् रिक्तता गता।
वसन्ते पुष्पिताः के स्युः कीदृशा यान्ति खेचराः ॥ 17 ॥
पक्षीति-विमानगा इत्युत्तरम्। विः मा, नगाः।
कानित्यादि-विमान् लक्ष्मीरहितानित्यर्थः। अगाः वृक्षाः। विमानेन गच्छन्तीति विमानगाः।

सतृषां किं प्रियं रुद्रश्वशुरः कश्च कीदृशः।
दरिद्रः कीदृशो विष्णुदेहो वारिधरोपमः ॥ 18 ॥
सतृषामिति-वारि, धरः, अपमः, वारिधरोपमः।

कामुद्धार भगवान् किटिरूपतः का शुक्लन्तनोति कचमिन्दुसमं वदन्ति ।
किं वा समस्तकवयः प्रथमं कमेव नत्वा समस्तशुभकर्म समारभन्ते ॥ 19 ॥
कामिति-कुं जरा आननं - कुंजराननम् इति व्याससमासाभ्यां उत्तरम् अवधेयम् ।

का वा माता लोहिताङ्गस्य मोदात् के वा दत्ते राघवेणाऽङ्गदाय ।
कीदिृक् जातस्तेन रामेण वाली मोहं प्राप्ता जानकी सा कुतश्च ॥ 20 ॥
का वेति-कुः, अङ्गदे-हतः इति व्यासेन । कुरङ्गदेहत इति समासेन । स्वर्णमृगरूपमारीचदेहत इत्यारण्यकाण्डकथा ज्ञेया । (अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः । केयूरमङ्गदं तुल्ये इत्यमरः । वैडूर्यमणिचित्रे च वज्ररत्नविभूषिते । वालिपुत्राय धृतिमान् अङ्गदायाङ्गदे ददौ । इति वालमीकिरामायणे)

का धीमतः कविमता कथमेणहूतिर्वासाय का कथय हृद्विकृतिः कुतास्स्यात् ।
कीदृक् सामज उचितो महतां क्रमेण धीरेण पूरित इतीह वदोत्तराणि ॥ 21 ॥
काधीति - धीः, एण, पूः, इतः - मन्मथादित्यर्थः इकारस्य मन्मथावाचकत्वात् । कीदृक् समाजः महतां उचितः धीरेण पूरितः विदुषा परिष्कृत इत्यर्थः। (हूतिराकारणाह्वानं इत्यमरः)

गात्रं मुख्यं किमथ तनये को हितार्थ्युग्रपत्नी का वा हृद्यं परभृतकुलं केन काले वसन्ते ।
प्रश्नानां त्वं कथय शकलैरूत्तरं कीदृशोऽगः पुष्पव्रातं वितरति वने कंपितो मारुतेन ॥ 22 ॥
गात्रमिति - कं, पिता, उमा, रुतेन इति पूर्व पदच्छेदः । मारुतेन कंपितः अगः पुष्पव्रातं वितरति ।

मुनिन्त्रयाणां वर्णानां मेलने लेशमन्त्ययोः ।
प्रथमान्तिमयोर्ब्रूते पशून् पदमिदं वद ॥ 23 ॥
मुनिमिति - गालव इत्युत्त्रम् । लवः, गावः, गालवः ।

रसन्त्रयाणां वर्णानां मेलने दन्तमन्त्ययोः ।
प्रथमान्तिमयोर्ब्रूते पदं पदमिदं वद ॥ 24 ॥
रसमिति - पारद इत्युत्त्रम् । रदः, पादः, पारदः । (चपलो रसः सूतश्च पारदे इत्यमरः)

दैत्यवाचि त्रिभिर्वर्णैरन्त्याभ्यां नूत्नवाचकम् ।
आद्यान्त्याभ्यां वनाग्नेस्तु बोधकं तत्पदं वद ॥ 25 ॥
दैत्येति - दानव इत्युक्तरम् । नवः दावः दानवः ।

चतुर्णामपि वर्णानां मेलने हरिमाद्ययोः ।
दण्डमाद्यन्तयोर्ब्रूते करिणं तत्पदं वद ॥ 26 ॥
चतुर्णामिति - गदाग्रज इत्युत्तरम् । गदा-गजः गदाग्रजः ।

वर्णैश्चतुर्भिर्मधुजित्परं स्यात् अन्त्याक्षरद्वन्द्वत आह शंखम् ।
मध्यस्थवर्णद्वयतः प्रमोद - संबोधनं तत्पदमाशु वाच्यम् ॥ 27 ॥
वर्णैरिति - दामोदर इत्युत्तरम् । दरः मोद, दामोदरः ।

किञ्चिद्वर्णचतुष्टयात्मकपदं श्रीकण्ठवाच्यन्तिम - द्वन्द्वं चापि तमाह मध्ययुगळं चेत् प्रातिलोम्यादहो ।
तत्संबोधनमादिमान्त्यघटने मारं वदन्त्यादिमौ तत्संबोधनमाहतुः पदमिदं किं वा बुधैरूच्यताम् ॥ 28 ॥
किञ्चिदिति - स्मरहरः इत्युत्तरम् । अन्तिमद्वन्द्वं हर इति भागः । मध्ययुगळं रह इति भागः । सः प्रातिलोम्ये सति 'हर' संबोधनं वदति । आदिमान्त्यघटने स्मर इति भवति । आद्यद्वयं स्मर संबोधनं वदतीति ज्ञेयम् ।

निषेधवियदग्निधीजनकमक्षरैः केवलैः मुखान्तगतमेळने वदति मानवन्त्वन्त्ययोः ।
स्थितौ वदति रासभं वदत तत्पदं त्र्यक्षरं तृतीयसहितं न वा भवतु वाच्यभेदो न हि ॥ 29 ॥
निषेधेति - नखर इत्युत्तरम् । न-ख-र इति प्रत्येकाक्षरैः निषेध- आकाश-अग्निवाचक इत्यर्थः । मुखान्तगतमेळने आद्यन्त्ययोर्योगे नर इति भवति । अन्त्ययोः स्थितौ द्वितीयतृतीययोर्योगे खर इति भवति । तृतीयसहितमित्यादि - तृतीयाक्षररूपरेफाभावेऽपि 'नख' बोधकत्वात् वाच्यभेदो नास्तीति भावः ।

किञ्चिद्वर्णचतुष्टयात्मकपदं पङ्केरुहाक्षीं वदेत्
ब्रूते साक्षिणमादिमान्त्यघटने यद्वाऽन्त्ययोर्मेळने ।
मध्यस्ताक्षरयोस्तु मेलनवशात् भूमिं वदत्याद्ययोः
चेत्संबोधनकं बलस्य तु वदेत् किं तत्पदं पण्डिताः ॥ 30 ॥
किञ्चिदिति - सारसाक्षी इत्युत्तरम् । स्पष्टः अर्थः । (साक्षी, रसा, सार इति । भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरेत्यमरः )

भो भो यत्पदमादिमाक्षरयुगात् संख्यावतो वाचकं
द्वैतीयीक चतुर्थयोरपि पुनर्योगात्तमेवाह यत् ।
ब्रूते वर्णचतुष्टयादपि बुधश्रेष्ठं विनाद्येन चेत्
कैवर्तं प्रथमान्त्यमेलनवशात् दैवं हि तत् किं पदम् ॥ 31 ॥
भो भो इति - सुधीवर इत्युत्तरम् । अर्थः स्पष्टः ।

कं प्राप्ता कमला समाह्वय किटिं कस्मात् प्रदीपो लसन्
कस्माच्चक्रमरीह नाटककथाविच्छेदहेतुश्च कः ।
कोपघ्नं श्रयते भवेत्तु वदनं कस्मात् सुगन्धं फलं
कस्मात् बीजचयो ददात्यतिजवादंकोलतैलादरात् ॥ 32 ॥

कं प्राप्तेति - अंकोलतैलादरात् इति पदे । अम्, कोल, तैलात् अरात् (पुनः) अंकः, लता, एलादरात् इति पदच्छेदप्रकारो ज्ञेयः । बीजानामङ्कोलतैलसेके सति अतिशीघ्रमेव फलपर्यन्तविपाको जायत इति प्रसिद्धिः ।

## चतुर्थप्रकरणम् अन्तर्लापि-बहिर्लापिक्रमः

अभाववाचकः कोऽयं उपसर्गो गुणत्रये मध्यमं किं दरिद्रस्य कथं सम्बोधनं मतम् ।
सुदृशां रमणीया का को रथाद्यङ्गमुच्यते नारायणः कथं भूतो नीरजोपमदृग्युगः ॥ 33 ॥

अभावेति - निः, रजः, अपम, दृक्, युगः इति पदच्छेदः । नीरजोपमदृग्युग इति श्लोक एव उक्तत्वात् अयं अन्तर्लापीत्युच्यते । एवमेव सर्वत्र ।

प्रातः कीदृशमम्बुजातमसुराः स्पर्धा हि यैः कुर्वते यैः कुम्भः क्रियते च यैस्सनियमैर्नित्यं तपश्चर्यते ।
यैर्द्वारं पिदधाति या रसगुणञ्जानाति तिक्तादिकं तत्प्रश्नोत्तरमध्यवर्णघटितो देवस्स पायात्प्रभुः ॥ 34 ॥


प्रातरिति - कमलानिवास इत्यर्थः । विकचं, अमरैः, कुलालैः, मुनिभिः, कवाटैः रसना । अयं बहिर्लापी ।

शम्भोस्सुन्दरनामकस्य मधुरापुर्यां प्रिया भाति का
को लक्ष्मीविषकामधेनुशशिनामुत्पत्तिभूरुच्यते ।
किं मुख्येन्द्रियमिन्द्रियेषु सकलेष्वाभाति चन्द्रेण का
यः प्रश्नोत्तरमध्यवर्णघटितः पायात्स नारायणः ॥ 35 ॥

शंम्भोरिति - मीनाक्षी, वाराशिः नयनं, क्षणदा । (नारायण इत्युत्तरः - अन्तर्लापी । निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपेत्यमरः)

सम्बुद्धिः कथमण्डजस्य दमवन्मर्त्यस्य चाथो दमं
तन्मूलं सकलं च सद्गुणचयं ह्युत्पादयत्यत्र का ।
अन्तेवासिजनाय तां सकरुणं दत्ते च कश्श्रीपतेः
घण्टाप्याप यदात्मतां स जयताद्वेदान्तविद्यागुरुः ॥ 36 ॥

सम्बुद्धिरिति - वे, दान्त, विद्या, गुरुः । वेदान्ताचार्यदेशिकस्य वेंङ्कटेशघण्टावतारत्वं इति प्रसिद्धिः ।



कामार्ता हि भजन्ति का विदुरथो किं वा वितर्केऽव्ययं
जम्भारिः कमवाप चैन्दवकला कं प्राप मोहाय का ।
आहुः कीदृशमोषधीशमुडुभूसम्बोधनं स्यात्कथं
योगी कीदृग पेक्षितं किमिहस्त्वाप्तोपदेशः कथम् ॥ 37 ॥

कामार्ता इति - रामानुजं भज यमीशम् इत्याप्तोपदेशः । पदच्छेदस्तु - रामाः, नु, जम्भजयं, ईशं इति प्रथमम् । मोहाय केत्यादि - राः स्वर्णं । मानुजं लक्ष्मीसहोदरम् इत्यर्थः । भज, यमी, शं - सुखम् इत्यर्थः । एवं द्वितीयावृत्तौ पदच्छेदोऽवगन्तव्यः ।

का बाणतनया को वा प्रसूनैर्जयति प्रजाः ।
प्रश्नोत्तराद्यवर्णाभ्यां घटिता पातु देवता ॥ 38 ॥

का बाणेति - उषा, मारः अनयोराद्यवर्णघटिता देवता उमा पात्वित्यर्थः ।

शब्दग्राहकमिन्द्रियं किमु भवेत् कः कुड्मळो भ्राजते
काभिर्वा शशलाञ्चनो जनमनस्तोषस्तु कस्मिन् सति ।
भक्तानां शरणं च कौ भगवतश्शिष्यो गुरौ कीदृशो
यः प्रश्नोत्तरमध्यवर्णघटितस्तं वै मुनीन्द्रं भजे ॥ 39 ॥

शब्देति - वकुळाभरण इति भावः । श्रवणं, मुकुळः, कळाभिः, पिभवे, चरणौ, प्रणतः । शठकोपमुनेः वकुळाभरण इति नामाऽवगन्तव्यम् ।

भोग्यं किं को विधत्ते कमलविकसनं वारि मुञ्चन्ति के वा
के कुर्वन्ति प्रजानामवनमवयवे किं प्रधानं वदन्ति ।
रामं का प्राप के वा विदधति च तपो याऽनुयोगोत्तराणां
आद्यैर्वर्णैर्भवेत् सा मम दिशतु शुभं क्षीरवाराशिजाता ॥ 40 ॥

भोग्यमिति - क्षीरं, रविः, वारिदा, राजानः, शिरः, जानकी, तापसाः - एतेषामाद्यक्षरघटने क्षीरवाराशिजाता इति भवति, सा शुभं दिशत्वित्यर्थः ।

कीदृग्भाति पयोनिधिः प्रतिदिनं कालत्रये ब्राह्मणै -
र्जप्या का महतां यशस्समुदयः कीदृग्बुधैः कथ्यते ।
मूले चास्त्यधिकाञ्चि कस्य स महान् कामाक्षिदेव्याः पति -
र्यः प्रश्नोत्तरपूर्ववर्णघटितः पायात् स गंगाधरः ॥ 41 ॥

कीदृगिति - गंगाधर इत्युत्तरम् । गंभीरः, गायत्री, धवलः, रसालस्य ।

# पञ्चमप्रकरणम् - उत्तर प्रश्नक्रमः

राज्यमित्युत्तरं यत्र तत्र प्रश्नः कथं भवेत् ।
निधिजातञ्च कीदृक् स्यादिति प्रश्ने किमुत्तरम् ॥ 42 ॥

राज्यमिति-किन्नरेशगतम् ? इति प्रश्ने राज्यम् इत्युत्तरं स्यात् । स प्रश्न एव "निधिजातं कीदृक् ?" इति प्रश्नस्य उत्तरं भवेदिति अयम् उत्तर प्रश्नः । उत्तरं प्रश्नो भवतीति उत्तरप्रश्नः ।

गृध्रा इत्युत्तरं यत्र तत्र प्रश्नः कथं भवेत् ।
कीदृशाः पाण्डवाश्चेति प्रश्ने वा कीदृगुत्तरम् ॥ 43 ॥

गृध्रा इति-केशवप्रीतयः? इति प्रश्ने गृध्र इति उत्तरं स्यात् । स प्रश्न एव "पाण्डवाः कीदृशाः ?" इति प्रश्नस्य (केशव प्रीतयः) इति उत्तरम् ।

पूरुमित्युत्तरं यत्र तत्र प्रश्नस्तु कीदृशः ।
कस्मात् पुरा गजश्रेष्ठस्सरो नक्राकुलं ययौ ॥ 44 ॥

पूरुमिति - कञ्जरागात् (कं जरा अगात्?) इति प्रश्ने पूरुमित्युत्तरं भवेत् । कथमिति चेत् सर्वेषां जरा प्राप्तेः स्वाभाविकत्वेऽपि अकाले जरा प्राप्तिरत्रोच्यते । ययाति महराजस्य शुक्रशापप्राप्ता जरा तत्पुत्रेण पूरुणा अङ्गीकृतेति पौराणिकी कथा । तस्मात् कं जरा अगात् इति प्रश्ने पूरुमित्युत्तरं स्यात् । कञ्जरागात् इति स प्रश्न एव, "कस्मात् गजेन्द्रः नक्राक्रान्तं सरः प्राप इति प्रश्नस्य भगवदर्चनाय तामरसाशया ?" प्रापेत्युत्तरं भवेत् ।

अङ्गमित्युत्तरं यत्र शरदाकाश इत्यपि ।
स्यात्प्रश्नस्स कथं को हि धिक्करोति गुरूनपि ॥ 45 ॥

अङ्गमिति - कोपघन (कः अपघनः ?) इति प्रश्ने - अपघनस्य शरीरवाचकत्वात् अङ्गमित्युत्तरं स्यात् । अपगताः घना यस्मात् इति व्युत्पत्या "कोपघन" इति प्रश्ने शरदाकाश इत्यप्युत्तरं स्यात् । स प्रश्न एव कोपेन घनः कोपघन इति व्युत्पत्या "कः गुरूनपि धिक् करोति" इति प्रश्नस्योत्तरं स्यात् ।

कस्स्रष्टा जगतां तस्य तातः कः कस्सुशीलवान् ।
कः कोद्रव इति प्रश्नोत्तरेणैवोत्तरं वद ॥ 46 ॥

कस्स्रष्टेति । कोद्रव इति - कोरदूषकनामकधान्यविशेषः - तस्मात् - "कः कोद्रवः ?"इति पश्ने कोरदूषक इत्युत्तरं स्यात् । तदुत्तरं अन्यप्रश्नत्रयस्यापि, कः (ब्रह्मा), अः (विष्णुः) अदूषक इति पदच्छेदेन उत्तरत्रयात्मकं भवतीति भावः । (कोरदूषस्तु कोद्रव इत्यमरः)

खड्गः कमेति वृषभैर्भृशमूह्यते किं कीदृक् भवेत् कृपणजातमिति त्रयाणाम् ।
व्यासात् समासत इहोत्तरमस्तु सोऽयं प्रश्नस्सकोप इति यत्र सदुत्तरं स्यात् ॥ 47 ॥

खड्ग इति - कोशमिति प्रथमप्रश्नस्य । अन इति द्वितीय प्रश्नस्य । कोशे मनः यस्य तत् कोशमन इति समासेन तृतीय प्रश्नस्य उत्तरं भवेत् । तत् कोशमन इति पदमेव, कः अशमनः शान्तिरहितः इति व्युत्पत्या प्रश्नरूपं चेत् सकोप इति तत्रोत्तरं भवेदिति भावः । अनः शकटम् कोशः खड्गपिधानम् ।

## षष्ठप्रकरणम् - प्रश्नोत्तरम्

का सारभूमिराभाति कोपेतस्साधुसंघतः ।
कोद्रवो धान्यभेदस्स्यात् कामार्तां बाधते शशी ॥ 48 ॥
कोपवादरतो लोके का व्याख्याता पदावलिः ।
पथि को याति वेगेन केन सृष्टमिदं जगत् ॥ 49 ॥

कासारेति - का सारभूमिरिति प्रश्नस्य कासारवती भूतिः कासारभूमिः इति । तदेवोत्तर स्यादिति प्रश्नोत्तरम् । साधुसङ्गात् कः अपेत इति प्रश्नस्य कोपेत इति तदेवोत्तरम् । एवमेवोत्तरत्रापि ज्ञेयम् । (मारुते वेधसि ब्रध्ने पुंसि कइ त्यमरः, केन चतुर्मुखेन)

## सप्तमप्रकरणम् -चित्रोत्तरम्

कया सुधांशुराभाति केषु भाति च कालिमा ।
औदार्यं श्लाध्यते कस्य कयोः कङ्कणधारणम् ॥ 50 ॥

कयेति - कया इति प्रश्ने मध्ये लकारन्यासे कलया इति उत्तरम् । (एवमेव शे, र्ण, र अक्षरन्यासेन) केशेषु - कर्णस्य, करयोः इत्यवधेयम् ।

कामुकः कासु रमते कया वा राजते वरः ।
कञ्चिद्वर्णं निधायान्तः प्रश्नैरेवोत्तरं वद ॥ 51 ॥

कामुक इति-कासु - कान्तासु । कया-कन्यया । इत्थं प्रश्नवाचक-पदमध्ये कस्यचनाक्षरस्य निवेशे सति तदेवोत्तरं भवतीति चित्रोत्तरमिदमिति ज्ञेयम् ॥

